# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.3.5.9** | समयः- 3 तः 6पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – श्रीमद्भगवद्गीता (७-९) | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** १०

१ ज्ञानिनः दुर्लभत्वं कथम् उपवर्णितं गीतायाम्?

२ “दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥ इति श्लोकं यथाभाष्यं व्याख्यात।

३ भगवतः निर्वेदप्रकारं यथाग्रन्थं लिखत।

**प्रश्न २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** १०

१ मायाशब्दस्य तात्पर्यं यथाग्रन्थम् उपपायदत।

२ भक्तानां चातुर्विध्यं यथाग्रन्थं विलिख्य तेषु ज्ञानिनः श्रेष्ठ्यं च ब्रूत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधोनिर्दिष्टेषु प्रश्नेषु द्वावेव प्रश्नौ समाधेयौ।** १०

१ कैवल्यार्थिनां भगवदुपासनाप्रकारं उपासनानुरूपप्राप्तिप्रकारं च उपवर्णयत।

२ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्॥ इति श्लोकं सान्वयं व्याख्यात।

३ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥ इति श्लोकं व्याख्यात।

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लिखत ।** **१०**

१ ब्रह्मलोकपर्यन्तानां लोकानां तदन्तर्वर्तिनां च परमपुरुषसंकल्पकृताम् उत्पत्तिविनाशकालव्यवस्थां निरूपयत।

२ अष्टमाध्यायस्य सारभागं सङ्गृह्णीत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितेषु प्रश्नेषु प्रश्नद्वयं व्याख्येयम्।** **१०**

१ भगवतः पुरुषोत्तमस्य विश्वशरीररूपत्वं प्रतिपादयत।

२ अज्ञानां कामकामानां वृत्तं प्रतिपाद्य भगवदनुभवैकभोगानां महात्मनां विशेषं दर्शयत।

३ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ इति श्लोकं यथाभाष्यं व्याख्यात।

**प्रश्न ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **१०**

१ भगवता श्रीकृष्णेन नवमाध्याये स्वस्य अचिन्त्यमहिमानम् कथम् उपपादितम्? स्पष्टयत।

२ भाष्योक्तदिशा महात्मनां भगवदुपासनप्रकारम् उपवर्णयत ।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** **१०**

१ परमपुरुषवरणीयताहेतुभूतः गुणः कः?

२ भक्तेः निर्वचनं ब्रूत?

३ उपासनशब्दवाच्यं किम्?

४ परमात्मनः अष्टधा प्रकृतिः का?

५ आर्तः कः?

६ अधियज्ञशब्दनिर्दिष्टः कः ? कथम्?

७ को नाम अभ्यासः?

८ को नाम योगः?

९ केषां पुनरावृत्तिस्तु अवर्जनीया एव?

१० 'अक्षरः' इति शब्दस्यार्थं लिखत।

११ श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य नाम किम्?

१२ नवमाध्याये किं प्रतिपाद्यते?

१३ इदं जगत् केन व्याप्तम्?

१४ कदा सर्वाणि भूतानि तमः शब्दवाच्यां प्रकृतिं यान्ति?

१५ भगवान् केषां योगक्षेमं वहति?